# माण्डूक्योपनिषत्प्रणवात्मविज्ञानम्

**डॉ. रामचन्द्र शर्मा**[1]

अनादिकालात्प्रवर्तमानमिदं जगत् स्वकीयेन नवनवायमानेनाद्भुतस्वरूपेण विश्वस्वरूपपरिचिन्तकानां मनीषिणां मानसे महदाश्चर्यं समुत्पादयत् संविभ्राजते। "दृग्दृश्यभावेन" प्रतीयमानस्यास्याचिन्त्यरचनारूपत्वम्पुरस्कृत्य भगवता श्रीजगद्गुरुणा समुदीरितम् -

**"आश्चर्यवत्पश्यति कश्चिदेनमाश्चर्यवद् वदति तथैव चान्यः।**
**आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाप्येनं वेद न चैव कश्चित्॥**[2] इति।

"दृक्" - "प्रत्यगात्मा" - "द्रष्टृभावापन्नः", "दृश्यम्" - "अनात्मा" - "आत्मसंश्लिष्टं जगत्", "दृष्टि" - "ज्ञान-विज्ञानम्"।

प्रत्यक्षतोऽनुभूयमानमस्ति यद्देहसम्बद्धः कश्चित् प्रमाता "अहम्" इति प्रत्ययविमर्शतया आत्मत्वेनात्मानमनुभवन् प्रमेयत्वेन प्रतीयमानस्यास्य दृश्यरचनाप्रपञ्चरूपस्य प्रमितिमनुतिष्ठन् यथेष्टान् विषयानाददानः कर्त्तृत्वभोक्तृत्वापन्नः सन् संसरन् राजते।

"कौऽसौ? कुत आयातः? कथमुत्पन्नः? केनोत्पन्नः? किमस्य वास्तविकं स्वरूपम्? कथं संसरति? कास्य पारमार्थिकी गतिः" इति"।

एवमेव - प्रज्ञावतां दृश्यविषयेऽपि - "किमिदं? कुतः इदम्? कथमिदम्? केनेदम्? वास्तविकमवास्तविकं वेति" - जिज्ञासाः सञ्जायन्ते।

अत्र विषये भगवती श्रुतिर्निगदति - "**ब्रह्मैवेदं सर्वम्**", **सर्वमिदमयमात्मा**" - इति। अत एव आत्मबोधायैव विशेषेण प्रचोदयति - "**आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः। आत्मनो वा अरे दर्शनेन श्रुत्या मत्या विज्ञानेनेदं सर्वं विज्ञातम्।**[3]" इति।

---

[1] सहाचार्यः, श्रीलालबहादुरशास्त्री-राष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली।

[2] श्रीमद्भगवद्गीता-२.२९

[3] बृहदारण्यकोपनिषत्, २.४.५

## सृष्टिप्रक्रियाविषयेऽपि -

**"तस्माद् वा एतस्मादात्मन आकाशः सम्भूतः, आकाशाद्वायुः, वायोरग्निरग्नेरापः, अदभ्यः पृथिवी, पृथिव्यामोषधयः औषधिभ्योऽन्नम् अन्नत्पुरुषः। सोऽयम्पुरुषोऽन्नरसमयः"** इति।[१]

इत्थं प्रतीयमानस्य "दृश्यत्वेन" जगतः स्वरूपोपस्थितिः "दृग्भावेन" प्रतीयमानादात्मन एव सञ्जायते इति सृष्टिसमुत्पत्तिसिद्धान्तः श्रुत्या निर्दिश्यते।

माण्डूक्यश्रुतिरात्मस्वरूपरहस्यं समुद्घाटयन्ती प्रबोधयन्ति -

**"ओमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानम् - भूतं भवद् भविष्यदिति सर्वमोङ्कार एव! यच्चान्यत् त्रिकालातीतं तदपि ओङ्कार एव। सर्वं ह्येतद् ब्रह्म। आत्मात्मा ब्रह्मः सोऽयमात्मा चतुष्पात्।"**[२]

अत्र सार्धत्रिमात्रिकस्य "प्रणवस्य" सर्वात्मकता सम्प्रकाशिता। "दृग्दृश्यभावान्नं" सर्वमोङ्कार एव। अयमेव आत्मा। अयमेव ब्रह्म। "बृहत्वात्" - व्यापकत्वाद्, बृंहणत्वात् - सर्वाच्छादकत्वाच्चास्य ब्रह्मत्वम्बोध्यम्। अक्षरत्वात् - क्षरणरहितत्वादिदं त्रिकालाबाधितमत एव शाश्वतम्।

"जगज्जन्मादिकारणत्व" - ब्रह्मणः "तटस्थ"-लक्षणम्। तद्यथोक्तं महर्षिवेदव्यासेन - **"जन्माद्यस्य यतः"**[३] इति। अर्थात् अस्य - दृश्यरचनाप्रपञ्चस्य जगतः, जन्मादि - जन्मास्थितिभङ्गः, यतो - यस्मात्कारणाज्जायन्ते तदेव ब्रह्म। श्रुतिरपि निगदति -

**"यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ति, तद्ब्रह्म, तद्विजिज्ञासस्व"** [४]इति।

**"सत्यं ज्ञानमतन्तं ब्रह्म", "विज्ञानमानन्दं "ब्रह्म"** - इतिश्रुतिनिर्देशात् "सच्चिदानन्दरूपत्वं" ब्रह्मणः "स्वरूप" लक्षणम्, अत एव जगत्कारणतासिद्धान्तसमुपस्थापयन्ती श्रुतिर्निर्दिशति—

**"आनन्द्ध्येव खल्विमनि भूतानि जायन्ते तेन जातानि जीवन्ति, तत्प्रयन्त्यभिसंविशन्ति। आनन्दो ब्रह्मेति व्यजानात्।"**[५] इति।

---

[१] तैत्तिरीयोपनिषत् - २/९

[२] माण्डूक्योपनिषद् - १-२।

[३] ब्रह्मसूत्रम् - १/१/२।

[४] तैत्तिरीयोपनिषत् - ३/९।

[५] तैत्तिरीयोपनिषत् - ३/६।

इत्थमोङ्काराभिन्नं विज्ञानानन्दमयं ब्रह्म जगदधिष्ठानतया जगत्कारणतया च समवस्थितमस्तीति विज्ञेयम्।

अस्य प्रणवाभिन्नस्य ब्रह्मात्मनः चत्वारः पादाः विज्ञेयाः। यथा च पूर्वमुक्तम् - "सोऽयमात्मा चतुष्पात्"। "अकार", उकारमकारमात्राभिः क्रमेणजाग्रत्-स्वप्नसुषुप्तिरूपं दृश्यविशिष्टं चैतन्यमभिव्यज्यते। एवम् अर्धमात्रया - शुद्धं दृग्रूपं चैतन्यमभिव्यज्यते। अत्र माया एव पादरूपेण विज्ञेया। तथा च कार्षापण इव चतुष्पात्वं बोध्यं, न तु गौरिव? तद्यथोक्तम् - **"सोऽयमात्माध्यक्षरमोङ्करोऽधिमात्रं पादा मात्रा मात्राश्च पादा अकार उकारो मकार इति।"**[1]

तश्चाचोक्तमात्राभिरात्मनः स्वरूपं यथा व्यज्यते तथा श्रुतिर्विज्ञायमति-

"जागरितस्थानो बहिष्प्रज्ञः सप्ताङ्गः एकोनविंशतिमुखः स्थूलभुग्वैश्वानरः प्रथमः पादः।[2]"

"जागरितस्थान"-इन्द्रियैर्विषयोपलब्धिर्जागरितम्, तदेव स्थानमस्ति यस्य स "जागरितस्थान:", बहिष्प्रज्ञः" - स्वात्मव्यतिरिक्ते विषये प्रज्ञा यस्य स "बहिष्प्रज्ञः।" "सप्ताङ्गः" - सप्तान्यङ्गानि यस्य सः सप्ताङ्गः। कानि तानि? इति जिज्ञासायामुक्तमाचार्यशङ्करेण-

**"तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मात्मा सन्देहो बहुलो बस्तिरेव रयिः पृथिवी पादौ"**[3] इत्यग्निहोत्रकल्पनाशेषत्वेन आहवनीयोऽग्निरस्य मुखत्वेनोक्त इत्येवं इत्येवं सप्ताङ्गान्यस्य स सप्ताङ्गः।"[4]

तथा चास्य विश्वव्याप्तस्य स्थूलशरीरोपाध्यवच्छिन्नस्य व्यष्टिसमष्टिस्वरूपविश्व-वैश्वानरस्य पूर्वनिर्दिष्टानि अङ्गानीवाङ्गानि निम्नर्लखितरूपेण विज्ञेयानि - "द्युलोकः शिरः, मुखमग्निः, सूर्यो नेत्रे, वायुः प्राणः, हृदयस्थानीयत्वाद्हृदयम्, आकाशो मध्यदेहः, उदरम्, अन्नहेतुर्जलमुपस्थः, पादौ पृथ्वीति"।

"एकोनविंशतिमुखः" - पञ्च बुद्धीन्द्रियाणि श्रोत्रत्वक्चक्षुरसनघ्राणाख्यानि। पञ्च कर्मेन्द्रियाणि वाक्पाणिपापायूपस्थाख्यानि, चतुर्विधमन्तःकरणं मनोबुद्धिचित्ताहङ्काररूपम्। पञ्चप्राणाः प्राणापानसमानोदानव्यानरूपाः इति एकविंशतिसंख्याकानि यस्य स एकोनविंशतिमुखः स शब्दस्पर्शरूपरसगन्धरूपान् स्थूलाविषयान् समुपभुङ्क्ते, अत एव "स्थूलभुक्" इत्युच्यते। इत्यैवं विश्वेषां

---

[1] माण्डूक्योपनिशदः - ८।

[2] तत्रैव, ३

[3] छान्दोग्योपनिषत्, ५/१८/२

[4] शाङ्करभाष्यम् - ३

नराणामनेकधा नयनाद् वैश्वानरः, अथवा विश्वश्चासौ नरश्च इति विश्वानर, विश्वानर एव वैश्वानरः, सर्वेषु पिण्डेषु विद्यमानत्वात् एतत्स्थूलोपाधिविशिष्टचैतन्यं वैश्वानर इत्युच्यते। स प्रथमः पादः विज्ञेयः।

अग्रे श्रुतिर्निगदति - **"स्वप्नस्थानोऽन्तःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः प्रविविक्तभुक्तैजसो द्वितीयः पादः।[१]"**

बाह्यकरणेषु, संहतेषु सत्सु जाग्रद्वासनामयविषयोपलब्धिः स्वप्नः। स्वप्नस्थानमस्य स स्वप्नस्थानः। अत्र विषये भगवान् भाष्यकार आह - "जाग्रत्प्रज्ञा अनेकसाधना बहिर्विषयेवावभासमाना मनःस्पन्दनमात्रा सती तथाभूतं संस्कारं मनस्याधत्ते; तन्मनः तथा संस्कृतं चित्रित इव पटो बाह्यसाधनानपेक्षमविद्याकामकर्मभिः प्रेर्यमाणं जाग्रद्वदवभासते"[२] इति।

एवं यः स्वप्नस्थानः सोऽन्तःप्रज्ञः, इन्द्रियापेक्षया अन्तःस्थत्वात्मनसः जाग्रद्वासनारूपा प्रज्ञा अन्तरेव भाति। अत एव सः "अन्तःप्रज्ञः" इत्युच्यते। विषयशून्यायां प्रज्ञायां केवलप्रकाशरूपायां विषयित्वेन आत्मा भवति, अत एव "तैजस" इत्युच्यते। पूर्वविश्वावस्थायां प्रज्ञायाः सविषयत्वेन स्थूलरूपाया भोज्यत्वं भवति। अत्र पुनः केवलवासनारूपायाः प्राज्ञाया भोज्यत्वं भवति। अत एव "प्रविर्विक्तभुक्" इत्युच्यते। तथा च केवलप्रज्ञाधिरूढात् वासनामयानेव सूक्ष्मविषयानेव अस्यामवस्थायां भुङ्क्ते। इत्येवं तैजसाख्यो द्वितीयः पादो बोध्यः। अस्य समष्टिरूपम् "भूमात्मा" हिरण्यगर्भ इत्युच्यते।

अग्रे श्रुतिः तृतीयपादं समुपस्थापयितु पूर्वं सुषुप्तस्थानं विज्ञापयन्ती निगदति -

**"यत्र सुप्तो न कञ्चन कामं कामयते, न कञ्चन स्वप्नं पश्यति तत्सुषुप्तम्। सुषुप्तस्थान एकीभूतः प्रज्ञानघन एव आनन्दमयो ह्यानन्दभुक् चेतोमुखः प्राज्ञस्तृतीयः पादः।"**[३]

सुषुप्तावस्थायां जाग्रत्कालीनाः स्थूलविषया एवं स्वप्नकालीनाः सूक्ष्मविषया न प्रतीयन्ते। सर्वाणि प्रज्ञानानि तमोरूपे कारणशरीरे एकीभूतानीव भवन्ति इति एकोभूतं घनस्वरूपं प्रज्ञानं भवति। अतः सः "प्रज्ञानघन" इत्युच्यते। स एव विषयसम्बन्धजन्यदुःखानुभवराहित्याद् "आनन्दमयः" भवति। "आनन्दः" आत्मनः स्वरूपं किन्तु एषा अवस्था न पारमर्थिकानन्दरूपा तमसाऽऽवृतत्वादानन्दमयकोश एव। अत्र विषयविशिष्टं ज्ञानं न भवति। अपि तु प्रज्ञप्तिरूपमेव। अत एव "प्राज्ञ" इत्युच्यते। अस्य समष्टिरूपम् "ईश्वर" इति पदेनोच्यते। बोधलक्षणमेव मुखमिव मुखमस्य भवति स्वस्वरूपानन्दभोगायेति "आनन्दभुक्" चेतोमुख इत्युच्यते। अत्र स्वम् अपीतो गतो भवति। अतः "स्वपिति" इति व्यवह्नियते।

---

[१] माण्डूक्योपनिषत्, ४

[२] माण्डूक्योपनिषच्छाङ्करभाष्यम् - ४

[३] माण्डूक्योपनिषत्, ५

अस्य समष्टिस्वरूपमीश्वरमधिकृत्यं श्रुतिः अग्रे निर्दिशति -

"एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्याम्येष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानाम्"[१] इति।

श्रीमद्भगवद्गीतायामप्युक्तम् -

**"अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते"[२] इति।**
**"अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा[३]"**
**मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव"[४]**

अत एव समष्टिरूपे एकीभूतत्वादस्य "सर्वेश्वरत्वं सर्वज्ञत्वं अन्तर्यामित्वं सर्वकारणत्वं उत्पत्तिलयस्थानत्वम्" सर्वमपि सङ्गच्छते।

अथेदानीमोङ्कारस्यार्धमात्रया प्रतीयमानस्य चतुर्थपादस्य स्वरूपमुद्धाटयन्ती श्रुतिः समुदीरयति - "नान्तःप्रज्ञं नबहिःप्रज्ञं नोभयतःप्रज्ञं नप्रज्ञानघनं नप्रज्ञं नाप्रज्ञम्। अदृश्यमव्यवहार्यमग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यमेकात्मप्रत्ययसारं प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः"[५] इति।

पूर्वोक्ताभिः "अकार उकार मकार मात्राभिः क्रमेण जागत्-स्वप्न-सुषुप्ति-रूपस्य स्थूल- सूक्ष्म-कारणशरीरोपाध्यवच्छिन्नस्य दृश्यविशिष्टदृशिस्वरूपस्य विज्ञानमुपस्थाप्येदानीं शुद्धस्य निरवच्छिन्नस्य गगनोपमस्य साच्चिदानन्दस्वरूपस्य प्रश्नरहितस्य आत्मनः स्वरूपं सर्वदृश्यनिषेधपूर्वकं श्रुत्या निर्दिष्टम्। "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह"। अत अदृष्टमित्यादिविशेषणानि सङ्गच्छन्ते। सर्वविशेषरहितं तदेव आत्मनः शान्तं शिवम् अद्वैतं चतुर्थपादरूपेण विज्ञेयम्। अत्र तुरीयत्वं पूर्वावस्थात्रयसापेक्षमेव बोधाय सम्प्रोक्तम्। वस्तुतस्तु अखण्डरूपतैव तात्पर्यविषयतया सङ्गत्या। अस्यैव स्वरूपं वेदान्तसारकारेण मङ्गलाचरणे समुपस्थापितम् -

**"अखण्डं सच्चिदानन्दमवाङ्मनसगोचरम्।**
**आत्मानमाखिलाधारमाश्रयेऽभीष्टसिद्धये॥"[६] इति।**

---

[१] माण्डूक्योपनिषत्, ६

[२] श्रीमद्भगवद्गीता १०.८

[३] श्रीमद्भगवद्गीता ७.६

[४] श्रीमद्भगवद्गीता ७.७

[५] माण्डूक्योपनिषत्, ७

[६] वेदान्तसारः मङ्गलाचरणम्

सच्चिदानन्दलक्षणस्य प्रणवात्मनः ब्रह्मणः द्विधा स्वरूपस्थितिः विज्ञाप्यते। तद्यथा -

"द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत्। शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति॥ [1] इति।

अत्र एकस्यैव स्वरूपबोधाय द्विधा कथनम्, न तु वास्तविकं द्वित्त्वम्। वाच्यवाचकभावेन एकस्यैव स्वरूपसंस्थितिज्ञानविज्ञानसंसाधनाय सम्प्रोक्ता।

"तस्य वाचकः प्रणवः", "तज्जपस्तर्थमानतम्"[2] इति योगसूत्रद्वयेन शब्दार्थस्वरूपस्य एकस्यैव निदिध्यासनं महर्षिपतञ्जलिना संविज्ञापितम्। अत एव श्रुतिरद्वैतमुपस्थापयन्ती निगदति- "अमात्रश्चतुर्थोऽव्यवहार्यः प्रपञ्चोपशमं शिवोऽद्वैत एवमोङ्कार आत्मैव संविशत्यात्मनात्मानं य एवं वेद।"[3] इति शम्॥

**ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते।**
**पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते॥**
**ॐ शान्तिः शान्तिः शान्तिः**

---

[1] मैत्रायण्युपनिषद् ६/२२

[2] योगसूत्रम् - २७-२८

[3] माण्डूक्योपनिषत्, १२